पुं। सूर्य्यवंशीयनृपभेदः। यथा, हरिवंशे। १५। २२।
"अनरण्यसुतो निघ्नो निघ्नपुत्त्रौ बभूवतुः॥")

निचयः पुं, (नि+चि+"एरच्।" ३।३।५६। इत्यच्।) समूहः। (यथा, महाभारते।४।२।३।
"आहरिष्यामि दारूणां निचयान् महतो-ऽपि च॥")
निश्चयः। इति शब्दरत्नावली॥

निचिकी, स्त्री, (निचिना कायति शोभते इति। कै+क। गौरादित्वात् ङीष्।) नैचिकी। उत्तमा गौः। इत्यमरटीकायां भरतः॥

निचितं, त्रि, (निचीयते स्मेति। नि+चि+क्त।) पूरितम्। व्याप्तम्। इति हेमचन्द्रः। ६। १०६॥ (यथा, महाभारते।३।१२६।४।
"पश्य नानाविधाकारैरग्निभिर्निचितां महीम्॥")
सञ्चितम्। यथा, भावप्रकाशे अतिसाराधिकारे।
"वायुः प्रवृद्धो निचितं बलाशं
नुदत्यधस्तादहिताशनस्य॥"
नदीभेदे, स्त्री। यथा, महाभारते।६।९।१८।
"कौशिकीं त्रिदिवां कृत्यां निचितां रोहिता-रणीम्॥")

निचुलः, पुं, (निचोलति समुच्छ्रयतीति। नि+चुल+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) हिज्जलवृक्षः। इत्यमरः। २। ४। ६१॥ (पर्य्यायोऽस्य यथा,—
"इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) वेतसवृक्षः। इति राजनिर्घण्टः॥ निचोलः। इति हेमचन्द्रः।४। २११॥

निचुलकं, क्ली, (निचुल इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) निचोलकम्। इति हारावली। १६२॥

निचोलः, पुं, (निचोल्यत इति। नि+चुल+घञ्।) येन स्यूतेनास्यूतेन वा वस्त्रान्तरमाच्छाद्यते। इत्यमरभरतौ॥ घाकुड़ि इति ख्यातः। तत्पर्य्यायः। निचुलः २ उत्तरच्छदः ३ प्रच्छदपटः ४॥ इति हेमचन्द्रः। ३। ३४०॥ (यथा, राजतरङ्गिण्याम्। ३। १६६।
"सन्ततध्वान्तमिषतस्तीव्रशोकवशीकृताः।
आशासंकाशिरे नीलनिचोलाच्छादिता इव॥")

निचोलकः, पुं, (निचोल इव कायतीति। कै+क।) भटादेश्चोलाकृतिसन्नाहः। तत्पर्य्यायः। कूर्पासः २ वारवाणः ३ कञ्चुकः ४। इति हेमचन्द्रः। ३। ४३१॥

निच्छविः, क्ली, (निकृष्टा छविः साइश्यं यत्र।) तीरभुक्तिदेशः। इति त्रिकाण्डशेषः॥ त्रिहुत इति भाषा॥

निच्छिविः, पुं, वर्णसङ्करजातिभेदः। इति जटाधरः॥ यथा,—
"झल्लो मल्लश्च राजन्याद्व्रात्यात् निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड़ एव च॥"
इति मनुः। १०। २२॥

निजं, त्रि, (निश्चयेन जायत इति। नि+जन+डः।) स्वकीयम्। (यथा, हितोपदेशे।
"अयं निजः परो वेति गणना लघुचेतसाम्॥")
नित्यम्। इत्यमरः। ३। ३। ३२॥

निट्, [श्] स्त्री, (नितरां श्यति तनूकरोति व्यापारानिति। शो+कः। पृषोदरादित्वात् साधुः।) निशा। यथा,—
"वासतेयी निशाख्या च वासतेयी तमा-निशौ॥"
इति रात्रिपर्य्याये त्रिकाण्डशेषः॥
(यथा, मनुः। ९। ६०।
"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत् पुत्त्रं न द्वितीयं कथञ्चन॥")

निडीनं, क्ली, (नीचैर्डीनं पतनमस्मिन्।) पक्षिगतिविशेषः। (यथा, महाभारते।८।४१।२६।
"निडीनमथ संडीनं तिर्य्यग्डीनगतानि च॥")
शनैर्यानम्। इति जटाधरः॥

निढिका, स्त्री, कलायविशेषः। तेवोड़ा इति भाषा॥ तत्पर्य्यायः। सतीला २ तिरटी ३। इति शब्दचन्द्रिका॥

नितम्बः, पुं, (निभृतं तम्यते आकाङ्क्ष्यते कामुकैरिति। तम आकाङ्क्षायाम्+उण्वादयश्चेति साधुः। यद्वा, नितम्बति पीड़यति नायकचित्तमिति। नि+तम्ब हिंसायाम्+अच्।) स्त्रीकट्याः पश्चाद्भागः। इत्यमरः।२।६।७४॥ पाछा इति भाषा॥ (यथा, माघे। ११। ५।
"विपुलतरनितम्बाभोगरुद्धे रमण्याः
शयितुमनधिगच्छन् जीवितेशोऽवकाशम्॥")
स्कन्धः। रोधः। कटकः। (यथा, भट्टिकाव्ये। २। ८।
"गिरेर्नितम्बे मरुता विभिन्नं
तोयावशेषेण हिमाभमभ्रम्॥")
कटिमात्रम्। इति मेदिनी। बे, १२॥ (यथा, विदग्धमुखमण्डने।
"तरुण्यालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥")

नितम्बिनी, स्त्री, (अतिशयितो नितम्बोऽस्त्यस्या इति। नितम्ब+"अत इनिठनौ।"५।२।११५। इति इनिः स्त्रियां ङीप्।) प्रशस्तनितम्बविशिष्टा। इत्यमरः।२।६।३॥ (यथा, आर्य्यासप्तशत्याम्। ५५४।
"वैगुण्येऽपि महतां विनिर्म्मितं भवति कर्म्म शोभायै।
दुर्वहनितम्बमन्थरमपि हरति नितम्बिनीनृत्यम्॥")
स्त्रीमात्रम्। इति राजनिर्घण्टः॥ (यथा, कुमारसम्भवे। ३। ७।
"नितम्बिनीमिच्छसि मुक्तलज्जां
कण्ठे स्वयं ग्राहनिषक्तबाहुम्॥"
नितम्बविशिष्टे, त्रि। यथा, रघुः।१९।२६।
"लोभ्यमाननयनः श्लथांशुकै-
र्मेखलागुणपदैर्नितम्बिभिः॥")

नितरां, [म्] व्य, (नि+तरप्+"किमेत्तिङव्ययघेति।" ५।४।११। आमुप्रत्ययः।) सुतराम्। यथा,—
"नागेन्द्रगो नागधनाभिलाषी
वक्रोक्तिजालो नितरां कुशीलः॥"
इति कोष्ठीप्रदीपः॥

नितलं, क्ली, (नितरां तलमधोभागो यस्मिन्।) सप्तपातालान्तर्गतपातालविशेषः। इति शब्दरत्नावली॥

नितान्तं, क्ली, (नितान्यतीति। तम+कर्त्तरि क्तः। "अनुनासिकस्येति।" ६।४।१५। इति दीर्घः।) अतिशयः। (यथा, कुमारसम्भवे। ३। ४।
"केनाभ्यसूया पदकाङ्क्षिणा ते
नितान्तदीर्घैर्जनिता तपोभिः॥")
तद्वति, त्रि। इत्यमरः। १। १। ७०॥

नित्यं, क्ली, (नियमेन भवम्। नि+"अव्ययात् त्यप्।"४।२।१०४। इति त्यप्।) निरन्तरक्रियावचनम्। तत्पर्य्यायः। सततम् २ अनारतम् ३ अश्रान्तम् ४ सन्ततम् ५ अविरतम् ६ अनिशम् ७ अनवरतम् ८ अजस्रम् ९। इत्यमरः। १। १। ६६॥ प्रसक्तम् १० आसक्तम् ११ अश्रह्मम् १२। इति जटाधरः॥ तद्वति, त्रि। इत्यमरः॥ प्रत्यवायजनकीभूताभावप्रतियोगि। यथा एकादश्यामुपोषणं नित्यम्। ध्वंसप्रागभावाप्रतियोगि। यथा, गगनं नित्यम्। अहरहर्ज्जायमानम्। यथा, नित्यं क्रीड़न्ति कुमाराः। अहरहःक्रियमाणत्वेन विधिबोधितम्। यथा, स्नानतर्पणादिकं नित्यम्। अनवच्छिन्नपरम्पराकः। यथा, वर्णा नित्याः॥

नित्यः, त्रि, (नियमेन भवः। नि+"अव्ययात् त्यप्।" ४। २। १०४। इत्यत्र "त्यप् नेर्ध्रुव इति वक्तव्यम्।"इति वार्त्तिकोक्त्या त्यप्।) कालत्रयव्यापी। तत्पर्य्यायः। शाश्वतः २ ध्रुवः ३ सदातनः ४ सनातनः ५। इत्यमरः। ३।१।७२॥ (यथा, महाभारते। १। १००। २।
"दमो दानं क्षमा बुद्धिर्ह्रीर्धृतिस्तेज उत्तमम्।
नित्यान्यासन् महासत्त्वे शान्तनौ पुरुषर्षभे॥")
समुद्रे, पुं। इति राजनिर्घण्टः॥

नित्यकर्म्म, [न्] क्ली, (नित्यं कर्म्म।) प्रत्यवायजनकाभावप्रतियोगिकार्य्यम्। इति स्मृतिः॥ तद्यथा,—
"नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा।
गृहस्थस्य त्रिधा कर्म्म तन्निशामय पुत्त्रक!॥
पञ्चयज्ञाश्रितं नित्यं यदेतत् कथितं तव।
नैमित्तिकं तथा चान्यत् पुत्त्रजन्मक्रियादिकम्॥
नित्यनैमित्तिकं ज्ञेयं पर्व्वश्राद्धादि पण्डितैः॥"
इति मार्कण्डेयपुराणम्॥ *॥
तत्त्यागे दोषो यथा,—
"नित्यानां कर्म्मणां विप्र! तस्य हानिरहर्निशम्।
अकुर्व्वन् विहितं कर्म्म शक्तः पतति तद्दिने॥
प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि।
एवं नित्यक्रियाहानेः कर्त्ता मैत्रेय! मानवः॥